# ॥ गङ्गादशहरास्तोत्रम् ॥

ॐ नमः शिवायै गङ्गायैशिवदायै नमो नमः।

नमस्ते विष्णुरूपिण्यैब्रह्ममूर्त्यै नमोऽस्तु ते॥ १ ॥

नमस्ते रुद्ररूपिण्यैशाङ्कर्यै ते नमो नमः।

सर्वदेवस्वरूपिण्यैनमो भेषजमूर्तये॥ २ ॥

सर्वस्य सर्वव्याधीनांभिषक्छ्रेष्ठ्यै नमोऽस्तु ते।

स्थास्नुजङ्गमसम्भूतविषहन्त्र्यैनमोऽस्तु ते॥ ३ ॥

संसारविषनाशिन्यैजीवनायै नमोऽस्तु ते।

तापत्रितयसंहन्त्र्यैप्राणेश्यै ते नमो नमः॥ ४ ॥

शान्तिसन्तानकारिण्यैनमस्ते शुद्धमूर्तये।

सर्वसंशुद्धिकारिण्यैनमः पापारिमूर्तये॥ ५ ॥

भुक्तिमुक्तिप्रदायिन्यैभद्रदायै नमो नमः।

भोगोपभोगदायिन्यैभोगवत्यै नमोऽस्तु ते॥ ६ ॥

मन्दाकिन्यै नमस्तेऽस्तुस्वर्गदायै नमो नमः।

नमस्त्रैलोक्यभूषायैत्रिपथायै नमो नमः॥ ७ ॥

नमस्त्रिशुक्लसंस्थायैक्षमावत्यै नमो नमः।

त्रिहुताशनसंस्थायैतेजोवत्यै नमो नमः॥ ८ ॥

# ॥ गङ्गादशहरास्तोत्रम् ॥

नन्दायै लिङ्गधारिण्यैसुधाधारात्मने नमः ।

नमस्ते विश्वमुख्यायैरेवत्यै ते नमो नमः ॥ ९ ॥

बृहत्यै ते नमस्तेऽस्तुलोकधात्र्यै नमोऽस्तु ते ।

नमस्ते विश्वमित्रायैनन्दिन्यै ते नमो नमः ॥ १० ॥

पृथ्व्यै शिवामृतायै चसुवृषायै नमो नमः ।

परापरशताढ्यायैतारायै ते नमो नमः ॥ ११ ॥

पाशजालनिकृन्तिन्यैअभिन्नायै नमोऽस्तु ते ।

शान्तायै च वरिष्ठायैवरदायै नमो नमः ॥ १२ ॥

उग्रायै सुखजग्ध्यै चसञ्जीवन्यै नमोऽस्तु ते ।

ब्रह्मिष्ठायै ब्रह्मदायैदुरितघ्न्यै नमो नमः ॥ १३ ॥

प्रणतार्तिप्रभञ्जिन्यैजगन्मात्रे नमोऽस्तु ते ।

सर्वापत्प्रतिपक्षायैमङ्गलायै नमो नमः ॥ १४ ॥

शरणागतदीनार्तपरित्राणपरायणे ।

सर्वस्यार्तिहरे देविनारायणि नमोऽस्तु ते ॥ १५ ॥

निर्लेपायै दुर्गहन्त्र्यैदक्षायै ते नमो नमः ।

# ॥ गङ्गादशहरास्तोत्रम् ॥

परापरपरायै चगङ्गे निर्वाणदायिनि॥ १६ ॥

गङ्गे ममाग्रतो भूयागङ्गे मे तिष्ठ पृष्ठतः।

गङ्गे मे पार्श्वयोरेधिगङ्गे त्वय्यस्तु मे स्थितिः॥ १७ ॥

आदौ त्वमन्ते मध्येच सर्वं त्वं गाङ्गते शिवे।

त्वमेव मूलप्रकृतिस्त्वंपुमान् पर एव हि।

गङ्गे त्वं परमात्मा चशिवस्तुभ्यं नमः शिवे॥ १८ ॥

य इदं पठते स्तोत्रंश्शृणुयाच्छूद्धयाऽपि यः।

दशधा मुच्यते पापैःकायवाक्चित्तसम्भवैः॥ १९ ॥

रोगस्थो रोगतोमुच्येद्विपद्भ्यश्च विपद्यतः।

मुच्यते बन्धनाद् बद्धोभीतो भीतेः प्रमुच्यते॥ २० ॥

सर्वान्कामानवाप्नोतिप्रेत्य च त्रिदिवं व्रजेत्।

दिव्यं विमानमारुह्यदिव्यस्त्रीपरिवीजितः॥ २१ ॥

गृहेऽपि लिखितं यस्यसदा तिष्ठति धारितम्।

नाग्निचौरभयं तस्यन सर्पादिभयं क्वचित्॥ २२ ॥

ज्येष्ठे मासि सितेपक्षे दशमीहस्तसंयुता।

# ॥ गङ्गादशहरास्तोत्रम् ॥

संहरेत् त्रिविधं पापंबुधवारेण संयुता ॥ २३ ॥

तस्यां दशम्यामेतच्चस्तोत्रं गङ्गाजले स्थितः ।

यः पठेद्दशकृत्वस्तुदरिद्रो वापि चाक्षमः ॥ २४ ॥

सोऽपि तत्फलमाप्नोतिगङ्गां सम्पूज्य यत्नतः ॥ २५ ॥

॥ इति श्रीस्कन्दमहापुराणे काशीखण्डे ईश्वरकथितं गङ्गादशहरास्तोत्रं सम्पूर्णम् ॥